This question paper contains **4+2** printed pages]

**Roll No.** | | | | | | | | | | | |

S. No. of Question Paper : **6916**

Unique Paper Code : **213481** **E**

Name of the Paper : **Paper IX (Sanskrit Literature and Modern Poetry and Drama)**

Name of the Course : **B.A. (Hons.)**

Semester : **IV**

Duration : **3 Hours** Maximum Marks : **75**

*(Write your Roll No. on the top immediately on receipt of this question paper.)*

(इस प्रश्न-पत्र के मिलते ही ऊपर दिए गए निर्धारित स्थान पर अपना अनुक्रमांक लिखिए ।)

**Note :** Unless otherwise required in a question, answer should be written in Sanskrit *or* in Hindi *or* in English; but the same medium should be used throughout the paper.

**टिप्पणी :** अन्यथा आवश्यक न होने पर इस प्रश्न-पत्र का उत्तर संस्कृत **या** हिन्दी **या** अंग्रेज़ी किसी एक भाषा में दीजिए; परन्तु सभी उत्तरों का माध्यम एक ही होना चाहिए ।

Answer *all* questions.

**सभी** प्रश्नों के उत्तर दीजिए ।

1. निम्नलिखित का अनुवाद कीजिए : 2×5=10

Translate the following :

(क) समुत्खाता नन्दा नव हृदयरोगा इव भुवः

कृता मौर्ये लक्ष्मीः सरसि नलिनीव स्थिरपदाः ।

द्वयोः सारं तुल्यं द्वितयमभियुक्तेन मनसा

फलं कोपप्रीत्योर्द्विषति च विभक्तं सुहृदि च ॥

अथवा

*(Or)*

पृथिव्यां किं दग्धाः प्रथितकुलजाः भूमिपतयः
पतिं पापे मौर्ये यदसि कुलहीनं वृतवती ।
प्रकृत्या वा काशप्रभवकुसुमप्रान्तचपला
पुरन्ध्रीणां प्रज्ञा पुरुषगुणविज्ञानविमुखी ॥

(ख) उल्लङ्घयन् मम समुज्वलतः प्रतापं
कोपस्य नन्दकुलकाननधूमकेतोः ।
सद्यः परात्म–परिमाणविवेकमूढः
कः शालभेन विधिना लभतां विनाशम् ॥

अथवा

*(Or)*

कुले लज्जायां च स्वयशसि च माने च विमुखः
शरीरं विक्रीय क्षणिकमपि लोभाद् धनवति ।
तदाज्ञां कुर्वाणो हितमहितमित्येतदधुना
विचारातिक्रान्तः किमिति परतन्त्रो विमृशति ॥

2. निम्नलिखित की सप्रसङ्ग व्याख्या कीजिए : 2×8=16

Explain with reference to the context of the following :

(क) चाणक्येनाकरुणेन सहसा शब्दायितस्यापि जनस्य ।
निर्दोषस्यापि शङ्का किं पुनर्मम जातदोषस्य ॥

**अथवा**

(*Or*)

कन्या तस्य वधाय या <u>विषमयी</u> गूढं प्रयुक्ता मया
दैवात्पर्वतकस्तया स निहतो यस्तस्य राज्यार्धहृत् ।
ये शस्त्रेषु रसेषु च प्रणिहितास्तैरेव ते घातिता
मौर्यस्यैव फलन्ति पश्य विविधश्रेयांसि मन्नीतयः ॥

(ख) अक्षीणभक्तिः क्षीणेऽपि नन्दे स्वाम्यर्थमुद्वहन् ।
पृथिव्यां स्वामिभक्तानां प्रमाणे परमे स्थितः ॥

**अथवा**

(*Or*)

ये याताः किमपि <u>प्रधार्य</u> हृदये पूर्वं गताः एव ते
ये तिष्ठन्ति भवन्तु तेऽपि गमने कामं प्रकामोद्यमाः ।
एका केवलमेव साधनविधौ सेनाशतेभ्योऽधिका
नन्दोन्मूलनदृष्टवीर्यमहिमा बुद्धिस्तु मा गन्मम ॥

3. प्रश्न संख्या एक और दो में रेखांकित पदों में से किन्हीं **पाँच** पर व्याकरणात्मक टिप्पणी लिखिए । 5×1=5

Write grammatical notes on any *five* underlined words given in the question no. one and two.

4. निम्नलिखित में से किन्हीं **तीन** पर संक्षिप्त टिप्पणियाँ लिखिए : 3×3=9

Write short notes on any *three* of the following :

सूत्रधार, जनान्तिक, भरतवाक्य, नेपथ्य, नान्दी ।

5. निम्नलिखित में से किसी **एक** पर अपने विचार प्रस्तुत कीजिए : 10×1=10

Attempt any *one* of the following :

मुद्राराक्षस के आधार पर कृतककलह का महत्त्व लिखिए ।

Write the importance of कृतककलह according to Mudrarakshas.

**अथवा**

(*Or*)

राक्षस का चरित्र-चित्रण लिखिए ।

Write the character sketch of Rakshas.

6. निम्नलिखित में से किन्हीं **दो** की सप्रसङ्ग व्याख्या कीजिए : 2×5=10

Explain with reference any *two* of the following :

(क) मद्यं हि सर्वस्वहरं नराणां, कुटुम्बनाशोऽपि च निश्चितोऽस्ति ।

निपीय मद्यं गृहमागतेभ्यः कदापि नान्नं परिवेषणीयम् ॥

**अथवा**

(*Or*)

अज्ञान-भस्मावरणानि धूत्वा, मनःस्थितां चेतयत स्फुलिङ्गान् ।

उद्दीपित-स्वत्व कृशानुनाऽऽशुभस्मीकुरुध्वं दृढ-रूढ-रूढीः ॥

(ख) वयं निमग्ना चिर-दास्य-पङ्के उद्धर्तुमस्मानितरो न शक्तः ।

अज्ञान-भस्मावरणं विधूय स्वत्वानलः प्रज्वलितो विधेयः ॥

**अथवा**

*(Or)*

अज्ञानदूरीकरणार्थमेवसमागताः स्मोऽत्र सुदूरतोऽपि ।

संस्थापनीयाश्च निजाधिकारा निपीय भूयः सलिलं सरस्याः ॥

7. निम्नलिखित में से किसी **एक** का अनुवाद कीजिए : 1×5=5

Translate any *one* of the following :

रिक्षाचालको हसति स्म । सहसैव निरगच्छन् तस्य मुखाद् वाक्यानि – 'न क्षमम् अज्ञे मयि विज्ञानां जिज्ञासितम् । लज्जे भवताम् एवं विधान् निशम्य । सप्तपदीनमुच्यते खलु सख्यम् । तच्च रिक्षाचालकेषु अस्मासु प्रत्यक्षम् । पदद्वयं यात्रिणः, पदद्वयं चालकस्य, पदत्रयं च रिक्षायाः । एवं किल सर्वमपि विश्वमस्माकं रिक्षाचालकानां सखा । अलमधिकं लज्जयित्वा । अनुजानातु भवान् प्रस्थानाय । त्रैगुण्यसोदरा खलु त्रिचक्रीयं रिक्षायानस्य । इयमधिरूढान् संभावयतितरां संपूर्णापि त्रिलोकी । त्रिपादीयं भगवतो विक्रान्तस्य वामनस्य । नेयमुपरोद्धुं क्षमा दानेन । मानेनैवैषा शक्यते प्रसादयितुम् विनयश्चास्या अनितरसाधारणवात्सल्य औरस इवात्मजातः । त एवावमन्यन्ते ह्यत्र यः इमामुदरेण योजयन्ति ।

**अथवा**

*(Or)*

रिक्षा इत्युच्चैराकारितो रिक्षाचालको वायुयानेनागतमेकं यात्रिणम् उपेयाय । सुस्थः सुवेषो नातिवयस्कश्च यात्री तमेनमुपनिमन्त्रयामास दशभीरुप्यकैर्विश्वविद्यालयपरिसरे स्थितं स्वकीयमावासमुपेतुम् । रिक्षाचालको विसिष्मिये को नु खल्वसौ महानुभावो यो हि पञ्चभिरेव

रूप्यकैः प्राप्तव्यं स्थानं दशभिः संभावयते । अर्धपूर्णेन समानयतोऽस्य नास्ति द्वैगुण्येपि वैगुण्यपारिश्रमिकस्य । लोको हि रूप्यकस्य स्थाने पञ्चाशदेव पणान् दातुं यतते रिक्षाचालकेभ्यः । अयं पुनरनुन्मत्तोऽपि प्रतीपमाचरति । भवितव्यम् अनेन विशिष्टेनेति । विस्मयमानं रिक्षाचालकं यात्री प्राब्रूत-कियन्ति वर्षाणि तव रिक्षां चालयतः । 'चत्वारिंशद्' इति रिक्षाचालकः प्रत्युवाच ।

8. 'कतमा कविता' इस कविता के प्रतिपाद्य विषय को स्पष्ट कीजिए । 1×10=10

Depict the subject matter of the 'कतमा कविता'.

**अथवा**

*(Or)*

'धीवरगीति' नामक कविता के कवि 'राधावल्लभ त्रिपाठी' के व्यक्तित्व एवं कृतित्व पर प्रकाश डालिए ।

Throw light on the life and works of 'Radha Vallabh Tripathi' the poet of the 'धीवरगीति'.